कै. त्र्यंबकशास्त्री भट यांचे संग्रहापैकी. वाई

संस्कृत] ग्रं.नं.२१ …करण

# राजवाडे

अंक ______ शाखा व्याकरण

ग्रंथनाम सिद्धान्तकौमुदी

ग्रंथकार भट्टोजी दीक्षित.

काल ______ पृष्ठ ______

स्थल ______

इ. वि. का. राजवाडे संशोधन मंडळ
क्रमांक २१
हस्तलिखित ग्रंथ संग्रह.

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(1)

॥सिद्धांतकौमुदीसर्वार्थप्रारंभः॥श्रीमहालक्ष्मीप्रसन्न॥

इ. वि. का. राजवाडे संशोधन मंदिर
क्रमांक ....
हस्तलिखित ग्रंथ संग्रह

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

उपपदविभक्तेः कारकविभक्तिर्बलीयसी

सि॰ कौ॰ श्रीगणेशायनमः॥श्रीसरस्वत्यैनमः॥अविघ्नमस्तु॥मुनित्रयंनमस्कृत्यतदुक्तीःपरिभाव्यच॥
॥१॥ वैय्याकरणसिद्धांतकौमुदीयंविरच्यते॥१॥अइउण्॥ऋलृक्॥एओङ्।ऐऔच्॥हयवरट्लण्॥
ञमङणनम्॥झभञ्॥घढधष्॥जबगडदश्॥खफछठथचटतव्॥कपय्॥शषसर्॥हल्॥
(2) इतिमाहेश्वरसूत्राण्यणादिसंज्ञार्थानि॥एषामंत्याइतः॥लण्सूत्रेऽकारश्च॥हकारादिष्वका
रउच्चारणार्थः॥हलंत्यं॥हलितिसूत्रेंऽत्यमित्स्यात्॥आदिरंत्येनसहेता॥अंत्येनेतासहित आदि
र्मध्यगानांस्वस्यचसंज्ञास्यात्॥इतिहलसंज्ञायां॥हलंत्यं॥उपदेशेंत्यंहलित्स्यात्॥उपदेशआ
द्योच्चारणं॥ततोणच्इत्यादिसंज्ञासिद्धौ॥उपदेशेजनुनासिकइत्॥उपदेशेजनुनासिको
जित्संज्ञः स्यात्॥प्रतिज्ञानुनासिक्याःपाणिनीयाः॥लण्सूत्रस्थावर्णेनसहोच्चार्यमाणो
रेफोरलयोःसंज्ञा॥प्रत्याहारेष्वितांनग्रहणं॥अनुनासिकइत्यादिनिर्देशात्॥नह्यत्रक लक्ष्मी
॥१॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan Mumbai

(2A) कारेपरेअच्कार्यंदृश्यते॥आदिरंत्येनेत्सेतत्सूत्रेणकृताःप्रत्याहारशब्देनव्यवह्रियंते॥ऊकालोऽ
ज्ह्रस्वदीर्घप्लुतः।उश्चऊश्चऊ३श्चवः॥वांकालइवकालोयस्यसोच्क्रमात्ह्रस्वदीर्घप्लुतसंज्ञः
स्यात्॥सप्रत्येकमुदात्तादिभेदेनत्रिधा॥उच्चैरुदात्तः॥ताल्वादिषुसभागस्थानेषुऊर्ध्वभागेनि
ष्पन्नोजुदात्तसंज्ञःस्यात्॥आयेत्वंति॥नीचैरनुदात्तःस्पष्टं॥अर्वाङ्॥समाहारःस्वरितः॥उदा
त्तानुदात्तत्वेवर्णधर्मौसमाह्रियेतेयस्मिन्सोच्स्वरितसंज्ञःस्यात्॥तस्यादितउदात्तमर्धह्र
स्वं॥ह्रस्वग्रहणमतंत्रं॥स्वरितस्यादितोर्धमुदात्तंबोध्यं॥उत्तरार्धंतुपरिशेषादनुदात्तं॥त
स्यचोदात्तस्वरितपरत्वेश्रवणंस्पष्टं॥अन्यत्रतूदात्तश्रुतिःप्रातिशाख्येप्रसिद्धा॥क्व१वोश्वाः॥
रथानांनये३राः॥शतचक्रंयोह्यइत्यादिष्वनुदात्तश्रुतिः॥अग्निमीळेइत्यादौतूदात्तश्रुतिः॥सन
वविधोपिप्रत्येकमनुनासिकाननुनासिकत्वाभ्यांद्विधा॥मुखनासिकावचनोनुनासिकः॥

... Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

से०कौ० मुखसहितनासिकयोच्चार्यमाणोवर्णोनुनासिकसंज्ञः स्यात्॥नदिशं॥अइउऋ एषांवर्णानांप्र ३०
॥२॥ त्येकमष्टादशभेदाः॥ऌवर्णस्यद्वादश॥तस्यदीर्घाभावात्॥एचामपिद्वादश॥एषांह्रस्वाभावात्॥
तुल्यास्यप्रयत्नंसवर्णं॥ताल्वादिस्थानमाभ्यंतरप्रयत्नश्चेत्येतद्द्वयंयस्ययेनतुल्यंतन्मिथःस
जै वर्णसंज्ञः स्यात्॥अकुहविसर्जनीयानांकंठः॥इचुयशानांतालु॥ऋटुरषाणांमूर्धा॥ऌतुलसानां
(3) दंताः॥उपूपध्मानीयानामोष्ठौ॥ञमङणनानांनासिकाच॥एदैतोः कंठतालु॥ओदौतोःकंठो
ष्ठं॥वकारस्यदंतोष्ठं॥जिह्वामूलीयस्यजिह्वामूलं॥नासिकाऽनुस्वारस्य॥इतिस्थानानि॥य
त्नोद्विधा॥आभ्यंतरोबाह्यश्च॥आद्यश्चतुर्धा॥स्पृष्टेषत्स्पृष्टविवृतसंवृतभेदात्॥तत्र
स्पृष्टंप्रयत्नंस्पर्शानां॥ईषत्स्पृष्टमंतस्थानां॥विवृतमूष्मणांस्वराणांच॥ह्रस्वस्यावर्णस्य ८
प्रयोगेसंवृतं॥प्रक्रियादशायांतुविवृतमेव॥एतच्चसूत्रकारेणज्ञापितं॥तथाहि॥अअइ लक्ष्मी
॥२॥

ति॥विवृतमनुष्यसंवृतोनेनविधीयते॥अस्यचाष्टाध्यायीसंपूर्णांप्रत्यसिद्धत्वाच्छास्त्रदृष्ट्या
(3अ) विवृतत्वमस्त्येव॥तथाचसूत्रं॥पूर्वत्रासिद्धं॥अधिकारोयं॥तेनसपादसप्ताध्यायींप्रतित्रिपा
दसिद्धात्रिपाद्यामपिपूर्वंप्रतिपरंशास्त्रमसिद्धं॥बाह्यप्रयत्नस्त्वेकादशधा॥विवारःसंवा
रःश्वासोनादोघोषोऽघोषोल्पप्राणोमहाप्राणउदात्तोनुदात्तःस्वरितश्चेति॥खयांयमाःखयः
≍क≍पौविसर्गःशरएवच॥एतेश्वासानुप्रदाना अघोषाश्चविवृण्वते॥कंठमन्येतुघोषास्युः
संवृतानादभागिनः॥अयुग्मावर्गयमगायणश्चाल्पासवस्मृताः॥वर्गेष्वाद्यानांचतुर्णांपंच
मेपरेमध्येयमोनामपूर्वसदृशोवर्णःप्रातिशाख्येप्रसिद्धः॥पलिक्क्नी॥चख्ख्नतुः॥अग्ग्निः॥
घ्नंतीत्यत्रक्रमेणखकगघेभ्यःपरेतत्सदृशाएवयमाः॥तत्रवर्गाणांप्रथमद्वितीयाःखयः॥
तथातेषामेवयमाः॥जिह्वामूलीयोपध्मानीयौ [illegible] विसर्गःशषसाश्चे

(५)

विवारः

सि॰ को ऐतेषां विसर्गः श्वासोऽघोषश्च ॥ अन्येषां तु संवारो नादो घोषश्च ॥ वर्गाणां प्रथमतृतीयपं सु॰

॥३॥ चमाः प्रथमतृतीयमौ यरलवाश्चाल्पप्राणाः ॥ अन्ये महाप्राणा इत्यर्थः ॥ बाह्यप्रयत्ना

श्च यद्यपि सवर्णसंज्ञायामनुपयुक्तास्तथाप्यान्तरतम्यपरीक्षायामुपयोक्ष्यन्त इति बोध्यं ॥ का

दयो मावसानाः स्पर्शाः ॥ यरलवा अन्तस्थाः ॥ शषसहा ऊष्माणः ॥ अचः स्वराः ॥ ᳵक ᳵप इति क

पाभ्यां प्रागर्धविसर्गसदृशौ जिह्वामूलीयोपध्मानीयौ ॥ अं अः इत्यचः परावनुस्वारविसर्गौ ॥

इति प्रयत्नविवेकः ॥ ऋलृवर्णयोर्मिथः सावर्ण्यं वाच्यं ॥ अकारहकारयोरिकारशकार

योः ऋकारषकारयोरीकारैका … रयोश्च सावर्ण्ये प्राप्ते ॥ नाज्झलौ ॥ आकारसहितोऽच् आ

ह च् स च हल् च ते ऐतौ मिथः सवर्णौ न स्तः ॥ तेन दधीत्यस्य हरति शीतलं षष्ठं सान्द्रमित्येतेषु परेषु

यणादिकं न ॥ अन्यथा दीर्घादीनामिव हकारादीनामपि ग्रहणकशास्त्रबलात् सवर्णत्वं स्यात् ॥ लक्ष्मी

॥३॥

(4A) तथाहि॥ अणुदित्सवर्णस्य चाप्रत्ययः॥ प्रतीयते विधीयते इति प्रत्ययः॥ अविधीयमानोण् उदिच्च सवर्णस्य सं
ज्ञा स्यात्॥ अत्राण् परेण णकारेण॥ कु चु टु तु पु एते उदितः॥ तदेवम् इत्यष्टादशानां संज्ञा॥ तथेकारोकारौ॥
ऋकारस्त्रिंशतः॥ एवं लृकारोपि॥ एचो द्वादशानां॥ एदैतोरोदौतोश्च न मिथः सावर्ण्यम् ऐऔजिति सूत्रारंभ
सामर्थ्यात्॥ तेनैचश्चतुर्विंशतेः संज्ञाः स्युरिति नापादनीयं॥ नाज्झलौ॥ इति निषेधो यद्यप्याक्षरसमाम्नायि
कानामेव॥ तथापि हकारस्य आकारो न सवर्णः॥ तत्राकारस्यापि प्रश्लिष्टत्वात्॥ तेन विश्वपाभिरित्यत्र हो
ढ इति ढत्वं न भवति॥ अनुनासिकाननुनासिकभेदेन यवला द्विधा॥ तेनाननुनासिकाः सो द्वयोर्द्वयोः सं
ज्ञा॥ तपरस्तत्कालस्य॥ तः परो यस्मात्स च तात्परश्चोच्चार्यमाणसमकालस्यैव संज्ञा स्यात्॥ तेन अत् इ
दित्यादयः षण्णां षण्णां संज्ञा॥ ऋदिति द्वादशानां॥ वृद्धिरादैच्॥ आदैच्च वृद्धिसंज्ञः स्यात्॥ अदेङ्गुणः॥ दे
अदेङ् च गुणसंज्ञः स्यात्॥ भूवादयो धातवः॥ क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युः॥ प्राग्रीश्वरान्निपा
ता इत्यधिकृत्य॥ चादयोसत्वे॥ अद्रव्यार्थाश्चादयो निपातसंज्ञाः स्युः॥ प्रादयः॥ अद्रव्यार्थाः प्रादयस्तथा॥

सिं०कौ० उपसर्गाःक्रियायोगे॥गतिश्च॥प्रादयःक्रियायोगेउपसर्गसंज्ञास्युर्गतिसंज्ञाश्चस्युः॥प्र॥परा॥अप॥सं॥ कारक

॥ ४॥ अनु॥अव॥निस्॥निर्॥दुस्॥दुर्॥वि॥आङ्॥नि॥अधि॥अपि॥सु॥उत्॥अभि॥प्रति॥परि॥उप॥

एतेप्रादयः॥नवेतिविभाषा॥निषेधविकल्पयोर्विभाषासंज्ञास्यात्॥स्वंरूपंशब्दस्याशब्दसंज्ञा॥श

(5) ब्दस्यस्वंरूपंसंज्ञिशब्दशास्त्रेयासंज्ञातांविना॥येनविधिस्तदंतस्य॥विशेषणंतदंतस्यसंज्ञास्यात्

स्वस्यचरूपस्य॥समासप्रत्ययविधौप्रतिषेधः॥उगिद्वर्णग्रहणवर्जं॥विरामोवसानं॥वर्णानाम

भावोवसानंस्यात्॥परःसंनिकर्षःसंहिता॥वर्णानामतिशयितःसंनिधिःसंहितासंज्ञःस्यात्॥सुप्तिङंतं

पदं॥सुबंतंतिङंतंचपदसंज्ञंस्यात्॥हलोनंतराःसंयोगः॥अज्भिरव्यवहिताहलःसंयोगसंज्ञास्युः॥

ह्रस्वंलघु॥संयोगेगुरु॥संयोगेपरेह्रस्वंगुरुसंज्ञंस्यात्॥दीर्घंच॥दीर्घंगुरुसंज्ञंस्यात्॥इतिसंज्ञा ॐ

प्रकरणं॥ ॥ छ ॥इकोगुणवृद्धी॥गुणवृद्धिशब्दाभ्यांयत्रगुणवृद्धीविधीयेतेतत्रेकइतिषष्ठ्यंतं लक्ष्मी

पदमुपतिष्ठते॥अचश्च॥ह्रस्वदिर्घप्लुतशब्दैर्यत्राच्विधीयतेतत्राचइतिषष्ठ्यंतंपदमुपतिष्ठते॥आद्यं

त्रा

॥४॥

(5A)

तौटकितौ॥ टित्‌कितौ यस्योक्तौ तस्य क्रमादाद्यंतावयवौ स्तः॥ मिदचोंत्यात्परः॥ अच इति निर्धारणे षष्ठी॥
अचां मध्ये योंत्यस्तस्मात्परस्तस्यैवांतावयवो मित्स्यात्॥ षष्ठी स्थानेयोगा॥ अनिर्धारितसंबंधविशे
षा षष्ठी स्थानेयोगा बोध्या॥ स्थानं च प्रसंगः॥ स्थानेंतरतमः॥ प्रसंगे सति सदृशतम आदेशः स्यात्॥ य
त्रानेकविधमांतर्यं तत्र स्थानत आंतर्यं बलीयः॥ तस्मिंनिति निर्दिष्टे पूर्वस्य॥ सप्तमीनिर्देशेन विधी
यमानं कार्यं वर्णांतरेणाव्यवहितस्य पूर्वस्य बोध्यं॥ तस्मादित्युत्तरस्य॥ पंचमीनिर्देशेन विधीयमानं
कार्यं वर्णांतरेणाव्यवहितस्य परस्य बोध्यं॥ अलोंत्यस्य॥ षष्ठीनिर्दिष्टांत्यस्यादेशः स्यात्॥ ङिच्च॥ अ
यमप्यंत्यस्य स्यात्॥ सर्वस्येत्यस्यापवादः॥ आदेः परस्य॥ परस्य यद्विहितं तत्तस्यादेर्बोध्यं॥ अलों
त्यस्येत्यस्यापवादः॥ अनेकाल्शित्सर्वस्य॥ स्पष्टं॥ अलोंत्यसूत्रापवादः॥ अष्टाभ्य औश् इत्यादावा
देः परस्येत्येतदपि परत्वादनेन बाध्यते॥ स्वरितेनाधिकारः॥ स्वरितत्वयुक्तं शब्दस्वरूपमधिकृतं बोध्यं॥

(८)

सि·कौ· परनित्यांतरंगापवादानामुत्तरोत्तरंबलीयः॥असिद्धंबहिरंगमंतरंगे॥अंतरंगेकार्येकर्तव्येबहिरंगमसिद्धंस्या सु०
॥५॥ त्॥अकृतव्यूहाःपाणिनीयाः॥निमित्तविनाशोन्मुखंदृष्ट्वातत्प्रयुक्तंकार्यंनकुर्वंतीत्यर्थः॥ ॥इतिपरिभा
षाप्रकरणं॥ ॥इकोयणचि॥इकःस्थानेयण्स्यादचिसंहितायांविषये॥सुधिउपास्यइतिस्थिते॥
स्थानतआंतर्यादीकारस्ययकारः॥सुध्य्उपास्यइतिस्थिते॥अनचिच॥अचःपरस्ययरोद्वेवास्तोनचि॥
इतिधकारस्यद्वित्वं॥स्थानिवदादेशोनल्विधौ॥आदेशःस्थानिवत्स्यात्॥नतुस्थान्यलाश्रयविधौ॥अ
नेनेहयकारस्यस्थानिवद्भावेनाच्त्वमाश्रित्यानचिचेतिद्वित्वनिषेधोनशंक्यः॥नल्विधावितितन्नि
षेधात्॥अचःपरस्मिन्पूर्वविधौ॥अल्विध्यर्थमिदं॥परनिमित्तोजादेशःस्थानिवत्स्यात्॥स्थानि
भूतादचःपूर्वत्वेनदृष्टस्यविधौकर्तव्ये॥इतियणःस्थानिवद्भावेप्राप्ते॥नपदांतद्विर्वचनवरेयलो लक्ष्मी
पःस्वरसवर्णानुदीर्घजश्चर्विधिषु॥पदस्यचरमावयवेद्विर्वचनादौकर्तव्येपरनिमित्तोजादेशोनस्था
॥५॥

(6A)

निवत्स्यात्॥इतिस्थानिवद्भा निषेधः॥झलांजश्झशि॥स्पष्टं॥इतिधकारस्यदकारः॥अदर्शनंलोपः॥
प्रसक्तस्यादर्शनंलोपसंज्ञंस्यात्॥संयोगांतस्यलोपः॥संयोगांतंयत्पदंतदंतस्यलोपस्यात्॥इतियलोपेप्राप्ते॥य
णःप्रतिषेधोवाच्यः॥यणोमयोद्वेवाच्ये॥मयइतिपंचमीयणइतिषष्ठीतिपक्षेयकारस्यापिद्वित्वं॥तदिहधकारयकार
योर्द्वित्वविकल्पाच्चत्वारिरूपाणि॥एकधमेकयं॥द्विधंद्वियं॥द्विधमेकयं॥एकधंद्वियं॥सुध्य्युपास्यः॥मध्वरिः॥धात्रंशः॥
लाकृतिः॥नादिन्याक्रोशेपुत्रस्य॥पुत्रशब्दस्यनद्वेस्तआदिनीशब्देपरेआक्रोशेगम्ये॥पुत्रादिनीत्वमसिपापे॥आक्रोशेकिं॥
तत्वकथनेद्विर्वचनंभवत्येव॥तत्परेच॥पुत्रपुत्रादिनीत्वमसिपापे॥वाहतजग्धयोः॥पुत्रहती॥पुत्त्रहती॥पुत्रजग्धी॥पुत्त्र
जग्धी॥त्रिप्रभृतिषुशाकटायनस्य॥त्र्यादिषुवर्णेषुसंयुक्तेषुवाद्वित्वं॥इन्द्रः॥इन्द्द्रः॥राष्ट्रं॥राष्ष्ट्रं॥सर्वत्रशाकल्यस्य॥द्वि
त्वंन॥अर्कः॥ब्रह्मा॥दीर्घादाचार्याणां॥द्वित्वंन॥दात्रम्॥पात्रम्॥अचोरहाभ्यांद्वे॥अचःपराभ्यांरेफहकाराभ्यांपरस्य
यरोद्वेवास्तः॥अत्रअनचिचेतिमात्रंरेफस्यद्वित्वं॥तत्कौंडिन्यायेनबाध्यते॥हर्य्यनुभवः॥नह्म्यस्ति॥हलोयमांयमिलो
पः॥हलःपरस्ययमोयलोपोवास्याद्यमिपरे॥इतियलोपपक्षेद्वित्वाभावपक्षेचैकयंरूपंतुल्यं॥लोपारंभफलंतुआदित्योदेव

(7) दिस्यदिखेस्यादिनाण्यत्प्रत्ययः

सि॰ कौ॰ ॥ ६ ॥

तायस्येस्यादि॑स्येहविः॥यमांयमीतियथासंख्यविज्ञानांनेह॥माहात्म्यं॥एचोयवायावः॥एचःक्रमादय्अव्आय्आव् सु॰
एतेस्युरचि॥तस्यलोपः॥तस्येतोलोपःस्यात्॥इतियवयोर्लोपोन॥उच्चारणसामर्थ्यात्॥एवंचेत्संज्ञापीहनभवति॥हर
ये॥विष्णवे॥नायकः॥पावकः॥वांतोयिप्रत्यये॥यकारादौप्रत्ययेपरेओदौतोरव्आव्एतौस्तः॥गोर्विकारोगव्यं॥गोपय
सोर्यत्॥नावातार्यनाव्यं॥नौवयोधर्मेत्यादिनायत्॥गोर्यूतौछंदस्युपसंख्यानं॥अध्वपरिमाणेच॥गव्यूतिः॥ऊतियूतीत्या
नायूतिशब्दोनीपातितः॥वांतइत्यत्रयकारात्गोर्यूतौ॥वेत्यत्रवकारात्पूर्वभागेलोपोव्योर्वलीतिलोपेनवकारःप्रश्लिष्यते॥
तेनश्रूयमाणवकारांतआदेशःस्यात्॥वकारोनलुप्यतइतियावत्॥धातोस्तन्निमित्तस्यैव॥यादौप्रत्ययेपरेधातोरेचश्चेद्वांतादे
ओरावस्यके शस्तर्हितन्निमित्तस्यैवनान्यस्य॥लव्यं॥अवश्यलाव्यं॥तन्निमित्तस्यैवेतिकिं॥ओयते॥औयत॥क्षय्यजय्यौशक्यार्थे॥यां
तादेशनिपातनार्थमिदं॥क्षेतुंशक्यं॥क्षय्यं॥जेतुंशक्यं॥जय्यं॥शक्यार्थेकिं॥क्षेतुंजेतुंयोग्यंक्षेयंपापंजेयंमनः॥क्रय्यस्तदर्थे॥
तस्मैप्रकृत्यर्थायइदंतदर्थं॥क्रेतारःक्रीणीयुरितिबुध्याआपणेप्रसारितंक्रय्यं॥क्रेयमन्यत्॥क्रयणार्हमित्यर्थः॥लोपःशा
कल्यस्य॥अवर्णपूर्वयोःपदांतयोर्यवयोर्लोपोवाशिपरे॥पूर्वत्रासिद्धमितिलोपशास्त्रस्यासिद्धत्वान्नस्वरसंधिः॥हरए लक्ष्मी
हि॥हरयेहि॥विष्णइह॥विष्णविह॥श्रियाउद्यतः॥श्रियायुद्यतः॥गुराउत्कः॥गुरावुत्कः॥कानिसंतिकोस्त्यइत्यत्रास्ते

॥ ६ ॥

Joint project of the Rajawade Samshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(3A)

॥ तवल्कारः ॥

असोरल्लोपस्यस्थानिवत्त्वेनयणावादेशौप्राप्तौ॥नपदांतेतिसूत्रेणपदांतविधौतन्निषेधोनास्ति॥एकःपूर्वपरयोरित्यधिकृत्य॥आद्गुणः॥
अवर्णादचिपरेपूर्वपरयोरेकोगुणआदेशःस्यात्संहितायां॥उपेंद्रः॥रमेशः॥गंगोदकं॥उरण्रपरः॥ऋइतित्रिंशतःसंज्ञेत्युक्तं॥नतत्स्था
नेयोण्सरपरःसंनेवप्रवर्त्तते॥तत्रांतरतम्यात्कृष्णऋद्धिरित्यत्रअर्तवल्कारइत्यत्राल्॥अचोरहाभ्यामितिपक्षेद्वित्वं॥झरोझरिसव
र्णे॥हलःपरस्यझरोलोपोवास्यात्सवर्णेझरि॥द्वित्वाभावेलोपेसति॥एकधं॥असतिलोपेद्वित्वलोपयोर्वाद्विधं॥सतिद्वित्वेलोपेचास
तित्रिधं॥कृष्णर्द्धिः॥यणइतिपंचमीमयइतिषष्ठीतिपक्षे॥वकारस्यापिद्वित्वं॥लस्यतुनचेतितेनतवल्कारइत्यत्ररूपचतुष्टयं॥
द्वित्वंलस्यैवकस्यैवनोभयोरुभयोर्वापि॥तवल्कारादिषुत्वेवंबोध्यंरूपचतुष्टयं॥वृद्धिरेचि॥आदेचिपरेवृद्धिरेकादेशःस्यात्॥
गुणापवादः॥कृष्णैकत्वं॥गंगौघः॥देवैश्वर्यं॥कृष्णौत्कंठ्यं॥एत्येधत्यूठ्सु॥अवर्णादेजाद्योरेत्येधत्योरूठिचपरेपूर्वपरयोर्वृद्धिरेका ६
देशात्॥पररूपगुणापवादः॥उपैति॥उपैधते॥प्रष्ठौहः॥एजाद्योःकिं॥उपेतः॥माभवान्प्रेदिधत्॥पुरस्तादपवादन्यायेनेयंवृद्धिरे
ङिपररूपस्यैवबाधिकानत्वोमाङोश्चेत्यस्यतेनावैहीतिवृद्धिरसाधुरेव॥अक्षादूहिन्यामुपसंख्यानं॥अक्षौहिणीसेना॥स्वादीरेरि
णोः॥स्वैरः॥स्वेनेरितुंशीलमस्येतिस्वैरीस्वैरिणी॥प्रादूहोढोढ्येषैष्येषु॥प्रौहः॥प्रौढः॥अर्थवद्ग्रहणेनानर्थकस्यग्रहणं॥
तेनऊढग्रहणेक्तांतमेवगृह्यते॥नतुक्तवत्वंतस्यैकदेशः॥प्रोढवान्॥प्रौढिः॥इषइच्छायांतुदादिः॥इषगतौदिवादिः॥इषआ
भीक्ष्ण्येक्र्यादिः॥एषांत्रयाणांत्रिष्वपिचएषः॥एष्यः॥इतिरूपे॥तत्रपररूपेप्राप्तेअनेनवृद्धिः॥प्रैषः॥प्रैष्यः॥यस्तुईषउंछे॥यश्च

॥त्रश्चेतिसूत्राजेःपृथक्कृत्वाजिग्रहणात्॥

ईषगतिहिंसादर्शनेषु॥नयोर्दीर्घोपिपचत्वात्‌ईषः॥ईष्यः॥तत्रात्तृशुणेप्रेषः॥प्रेष्यः॥ऋतेचतृतीयासमासे॥सुखेनऋतःसुखार्तः॥तृतीयेति सु०
किं॥परमर्तः॥प्रवत्सतरकंबलवसनार्णदशानामृणे॥प्रार्णं॥वत्सतरार्णमित्यादि॥ऋणस्यअपनयनायायदन्यदृणंक्रियतेतदृणार्णं॥दशा
र्णोदेशः॥नदीचदशार्णा॥ऋणशब्दोदुर्गभूमौजलेच॥उपसर्गादृतिधातौ॥अवर्णांतादुपसर्गादृकारादौधातौपरेवृद्धिरेकादेशःस्यात्‌॥
उपार्छति॥प्रार्छति॥अंतादिवच्च॥योयमेकादेशःसपूर्वस्यांतवत्परस्यादिवत्स्यात्‌॥इतिरेफस्यपदांतत्वे॥खरवसानयोर्विसर्जनी
यः॥खर्यवसानेचरेफस्यविसर्जनीयस्यात्पदांते॥इतिविसर्गेप्राप्ते॥अंतवद्भावेनपदांतस्यरेफस्यनविसर्गः॥उभयथर्क्षुकर्तरिचर्षि
देवतयोरित्यादिनिर्देशात्‌॥उपसर्गेणैवधातोराक्षेपेसिद्धे[illegible]धातावितियोगविभागेनपुनर्विधानार्थंतेनप्ररूयक इतिपाश्रिकोविप्रस्र
तिभावोत्रनभवति॥वासुप्यापिशलेः॥अवर्णांतादुपसर्गादृकारादौसुब्धातौरवृद्धिर्वास्यात्‌॥आपिशलिग्रहणंपूजार्थं॥प्रार्षभीयति॥प्र
र्षभीयति॥सावर्ण्याॢवर्णस्यग्रहणं॥प्राल्कारीयति॥प्रल्कारीयति॥तपरत्वाद्दीर्घेन॥उपऋकारीयति॥उपर्कारीयति॥एङिपररूपं॥
आदुपसर्गादेङादौधातौपरेपररूपमेकादेशःस्यात्‌॥प्रेजते॥उपोषति॥इहवासुपीत्यनुवर्त्यवाक्यभेदेनव्याख्यायंतेनएङादौसु
ब्धातौवा॥उपेडकीयति॥उपैडकीयति॥प्रोघीयति॥प्रौघीयति॥एवेचानियोगे॥नियोगोवधारणं॥अत्रत्वक्तृप्तावेवशब्दः॥क्व॥ केवभोक्षपसे ... लक्ष्मी
अनियोगेकिं॥नवेव॥अचोंत्यादिटि॥अचांमध्येयोंत्यः[illegible]सआदिर्यस्यतद्टिसंज्ञंस्यात्‌॥शकंध्वा
दिषुपररूपंवाच्यं॥तच्चटेः॥शकंधुः॥कर्कंधुः॥कुलटा॥सीमंतःकेशवेशे॥सीमांतोन्यः॥मनीषा॥हलीषा॥लांगलीषा॥पतंजलिः॥
सारंगःपशुपक्षिणोः॥सारंगोन्यः॥आकृतिगणोयं॥मार्तंडः॥ओत्वोष्ठयोःसमासेवा॥स्थूलोतुः॥स्थूलौतुः॥बिंबोष्ठः॥बिंबौष्ठः॥

(8A)

शि

समासेकिं॥तवौष्ठः॥ओमाङोश्च॥ओमि आङि चात्परे पररूपमेकादेशस्यात्॥शिवायोंनमः॥शिवएहि॥एहि॥अव्यक्तानुकर
णस्यातइतौ॥ध्वनेरनुकरणस्यअतोयोशब्दस्तस्मादितौपरे पररूपमेकादेशस्यात्॥पटत्इति॥पटिति॥एकाचोन॥श्रदिति॥ना
म्रेडितस्यांत्यस्यतुवा॥आम्रेडितस्यप्रागत्कंनस्यात्॥अंतस्यतुतकारमात्रस्यवास्यात्॥डाचिबहुलंद्वेभवतइतिबहुलवचनाद्दि
त्वं॥तस्यपरमाम्रेडितं॥द्विरुक्तस्यपररूपमाम्रेडितसंज्ञंस्यात्॥पटत्पटेति॥झलांजशोंते॥पदांतेझलांजशास्युः॥पटत्पटदिति॥
अकःसवर्णेदीर्घः॥अकःसवर्णेचिपरेदीर्घमेकादेशस्यात्॥दैत्यारिः॥श्रीशः॥विष्णूदयः॥अचिकिं॥कुमारीशेते॥नाज्झलावि
सावर्ण्य तिनिषेधस्तु [illegible]॥नदीर्घशकारयोर्ग्रहणकशास्त्रस्यवैसावर्ण्यैविधिनिषेधाभ्यांप्रागनिष्पत्तेः॥अकः
किं॥हरये॥अकोकिदीर्घइत्सेवसुवक्तव्यं॥ऋतिसवर्णेऋवा॥होतृकारः॥होतृकारः॥लृतिसवर्णेलृवा॥होतृलृकारः॥होतृकृ
रः॥पक्षेऋकारःसावर्ण्यात्॥होतृकारः॥ऋतिऋवालृतिलृवेत्युभयत्रापिविधेयंवर्णद्वयंद्विमात्रं॥आद्यस्यमध्येद्वौरेफौ
तयोरेकामात्राअभितोज्भक्तेरपरा॥द्वितीयस्यतुमध्येद्वौलकारौशेषंप्राग्वत्॥इहोभयत्रापिऋत्यकइतिपाक्षिकःप्र
कृतिभावोवक्ष्यते॥एङःपदांतादति॥पदांतादेङोतिपरे पूर्वरूपमेकादेशस्यात्॥हरेव॥विष्णोव॥सर्वत्रविभाषागोः॥लो
केवेदेचैङंतस्यगोरतियाप्रकृतिभावःपदांते॥गोअग्रं॥गोग्रं॥पदांतेकिं॥गोः॥एङंतस्यकिं॥चित्रग्वग्रं॥अवङ्स्फोटायनस्य॥
अतीतिनिवृत्तंअचिपरेपदांतेगोरवङ्वास्यात्॥गवाग्रं॥पदांतेकिं॥गवि॥व्यवस्थितविभाषयागवाक्षः॥इंद्रेच॥गोरवङ्

अ

(9) सि० कौ० ॥ ८ ॥ सु०

स्याद्दिष्टे ॥ गवेंद्रः ॥ अथ प्रकृतिभावः ॥ ॥ ७ ॥ ॥ प्लुतप्रगृह्या अचि नित्यं ॥ प्लुताः प्रगृह्याश्च वक्ष्यंते ते नित्यं
प्रकृत्या स्युः ॥ एहि कृष्ण ३ अत्र गौश्चरति ॥ हरी एतौ ॥ नित्यमिति किं ॥ हरी एतावित्यादावयमेव प्रकृतिभावो यथा स्यात् ॥
इकोऽसवर्णे इति ह्रस्वसमुच्चितो मा भूत् ॥ इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च ॥ पदांता इकोऽसवर्णेऽचि परे प्रकृत्या स्युः ह्रस्वश्च वा ॥ अत्र
ह्रस्वविधिसामर्थ्यादेव प्रकृतिभावे सिद्धे प्लुतदनुकर्षणार्थश्चकारो न कर्तव्य इति भाष्ये स्थितं ॥ चक्रि अत्र ॥ चक्र्यत्र ॥ पदांता
इति किं ॥ गौर्यौ ॥ न समासे ॥ वाप्यश्वः ॥ सिति च ॥ पार्श्वं ॥ ऋत्यकः ॥ ऋति परे पदांता अकः प्राग्वत् ॥ ब्रह्म ऋषिः ॥ ब्रह्मर्षिः ॥
॥ पदांता इत्येव ॥ आर्च्छत् ॥ समासेऽप्ययं प्रकृतिभावः ॥ सप्त ऋषीणां ॥ वाक्यस्य टेः प्लुत उदात्त इत्यधिकृत्य ॥
॥ प्रत्यभिवादेऽशूद्रे ॥ अशूद्रविषये प्रत्यभिवादे यद्वाक्यं तस्य टेः प्लुतः स्यात् ॥ अभिवादये देवदत्तोऽहं ॥
॥ भो आयुष्मानेधि देवदत्त ३ ॥ स्त्रियां न ॥ अभिवादये गार्ग्यहं ॥ भो आयुष्मती भव गार्गि ॥ नाम गोत्रं वा य
त्र प्रत्यभिवाक्यांते तत्र प्लुत इष्यते ॥ नेह ॥ आयुष्मानेधि ॥ भो राजन्य विशां वेति वाच्यं ॥ आयुष्मानेधि भो ३ ॥ आयुष्माने
धींद्रवर्मन् ३ ॥ आयुष्मानेधींद्रपालित ३ ॥ दूराद्धूते च ॥ दूरात्संबोधने यद्वाक्यं तस्य टेः प्लुतः स्यात् ॥ सक्तून् पिब देवदत्त ३ ॥
हैहेप्रयोगे हैहयोः ॥ एतयोः प्रयोगे दूराद्धूते यद्वाक्यं तत्र हैहयोरेव प्लुतः ॥ हे ३ राम ॥ राम है ३ ॥ गुरोरनृतोऽनंत्यस्याप्ये
कैकस्य प्राचां ॥ दूराद्धूते यद्वाक्यं तस्य ऋदिंगिन्नस्यानंत्यस्यापि गुरोर्वा प्लुतः स्यात् ॥ दे ३ वदत्त ॥ देवदा ३ त्त ॥ देवदत्ता ३ ॥ गु

पर्श्वणिस् वक्तव्यः

लक्ष्मी ॥ ८ ॥

(9A)

रोः किं॥ नकाराद्कारस्य मा भूत्॥ अन्त्यतः किं॥ कृष्णा३॥ एकैकग्रहणं पर्यायार्थं॥ इतश्चाचामिति योगो विभज्यते॥ तेन सर्वः प्लुतो
विकल्प्यते॥ अप्लुतवदुपस्थिते॥ उपस्थितो नार्ष इति३ इत्यस्मिन् परे प्लुतोऽप्लुतवत् भवति॥ अप्लुतकार्यं यणादिकं करोती
त्यर्थः॥ सुश्लोका३इति॥ सुश्लोकेति॥ वत्किं॥ अप्लुत इत्युक्ते अप्लुत एव वीधीयेत प्लुतश्च निषिध्येत तथा च प्रगृह्याश्रये प्र
कृतिभावे प्लुतस्य श्रवणं न स्यात्॥ अग्नी३इति॥ ई३ चाक्रवर्मणस्य॥ ई३ प्लुतोऽचि परे ऽप्लुतवत्॥ चिनुही३इदं॥ चिनुहीदं॥
चिनुही३इति॥ चिनुहीति॥ उभयत्र विभाषेयं॥ ईदूदेद्द्विवचनं प्रगृह्यं॥ ईदूदेदन्तं द्विवचनं प्रगृह्यसंज्ञं स्यात्॥ हरी एतौ॥ वि
पचेते इमौ॥ ष्णू इमौ॥ गंगे अमू॥ माणीवोष्ट्रस्येति तु इवार्थे वशब्दो वाशब्दो वा बोध्यः॥ अदसो मात्॥ अस्मात्परावीदूतौ प्रगृह्यौ स्तः॥
अमी ईशाः॥ रामकृष्णावमू आसाते॥ मात्किं॥ अमुकेऽत्र॥ असति मात्ग्रहणे एकारोऽप्यनुवर्तेत॥ शे॥ अयं प्रगृह्यः स्यात्॥
स्मे इंद्राबृहस्पती॥ निपात एकाजनाङ्॥ एकोऽज् निपात आङ्वर्जः प्रगृह्यः स्यात्॥ इ विस्मये॥ इ इंद्रं पश्य॥ उ वितर्के॥
उ उमेशः॥ अनाङिति किं॥ अङिदाकारः प्रगृह्य एव॥ आ एवं नु मन्यसे॥ आ एवं किल तत्॥ ङित्तु न प्रगृह्यः॥ ईषदुष्णं॥ ओ
ष्णं॥ वाक्यस्मरणयोरङित्॥ अन्यत्र ङिदिति विवेकः॥ ओत्॥ ओदन्तो निपातः प्रगृह्यः स्यात्॥ अहो ईशाः॥ संबुद्धौ शाक
ल्यस्येतावनार्षे॥ संबुद्धिनिमित्त ओकारो वा प्रगृह्योऽवैदिके इतौ॥ विष्णो इति॥ विष्णविति॥ विष्ण इति॥ उञः॥ उञ इ
तौ वा प्रगृह्यः॥ उ इति॥ विति॥ ऊँ॥ उञ इतौ दीर्घोऽनुनासिकः प्रगृह्यश्च ऊँ इत्ययमादेशो वा स्यात्॥ ऊँ इति॥ विति॥ मय उञो

॥ स्थान्यादेशयोर्यथासंख्यं। निमित्तकार्यिणोः न शात् इति ज्ञापकात्॥

सि॰कौ॰ वो वा॥ मयः परस्य उञो वो वा स्यात्॥ किम्वुक्तं॥ किमु उक्तं॥ वस्यासिद्धत्वान्नानुस्वारः॥ ईदूतौ च सप्तम्यर्थे॥ सु॰
सप्तम्यर्थे पर्यवसन्नमीदूदन्तं प्रगृह्यं स्यात्॥ सोमो गौरी अधिश्रितः॥ मामकी तनू इति॥ सुपां सुलुगिति सप्तम्या ति
॥९॥ लुक्॥ अर्थग्रहणं किं॥ वृत्ताद्यर्थान्तरोपसंक्रान्ते मा भूत्॥ वाप्याम् अश्वो वाप्यश्वः॥ अणोऽप्रगृह्यस्यानुनासिकः॥
अप्रगृह्यस्याणोऽवसानेऽनुनासिको वा स्यात्॥ दधीँ॥ दधि॥ अप्रगृह्यस्य किं॥ अग्नी॥ ॥ इत्यच्संधिः॥
स्तोः श्चुना श्चुः॥ सकारतवर्गयोः शकारचवर्गाभ्यां योगे शकारचवर्गौ स्तः॥ हरिश्शेते॥ रामश्चिनोति॥ सच्चित्॥ शार्ङ्गिञ्ज
य॥ शात्॥ शात्परस्य तवर्गस्य चुत्वं न स्यात्॥ विश्नः॥ प्रश्नः॥ ष्टुना ष्टुः॥ स्तोः ष्टुना योगे ष्टुः स्यात्॥ रामष्षष्ठः॥ रामष्टी
कते॥ पेष्टा॥ तट्टीका॥ चक्रिण्ढौकसे॥ न पदान्ताट्टोरनाम्॥ अनामिति लुप्तषष्ठीकं पदं। पदान्ताट्टवर्गात्परस्यानाम
स्तोः ष्टुर्न स्यात्॥ षट् सन्तः॥ षट् ते॥ पदान्तात्किं॥ ईट्टे॥ टोः किं॥ सर्पिष्टमं॥ अनाम्नवतिनगरीणामिति वाच्यं॥ ९
षण्णां॥ षण्णवतिः॥ षण्णगर्यः॥ तोः षि॥ तवर्गस्य षकारे परे न ष्टुत्वं॥ सन्षष्ठः॥ झलां जशोऽन्ते॥ वागीशः॥
चिद्रूपः॥ यरोऽनुनासिकेऽनुनासिको वा॥ यरः पदान्तस्यानुनासिके परेऽनुनासिको वा स्यात्॥ एतन्मुरारिः॥ एतद्मुरारिः॥ लक्ष्मी

एवं ष्टुना ष्टुरित्यत्रापि तोः षीति ज्ञापकात्

(70A)

स्थानप्रयत्नाभ्यांमंतरतमेस्पर्शौ चरितार्थौविधिरयंरेफेनप्रवर्त्तते ॥ चतुर्मुखः ॥ प्रत्ययेभाषायांनित्यं ॥ तन्मात्रं ॥
चिन्मयं ॥ कथंतर्हिमदोद्धग्राः ककुद्मन्तइति ॥ यवादिगणेदकारनिपातनात् ॥ तोर्लि ॥ तवर्गस्यलकारेपरेपरसवर्णः ॥
॥ तल्लयः ॥ विद्वाँल्लिखति ॥ नस्यानुनासिकोलः ॥ उदस्थास्तंभोःपूर्वस्य ॥ [illegible] ॥ उदः ॥
॥ परयोःस्थास्तंभोःपूर्वसवर्णः ॥ तस्मादित्युत्तरस्य ॥ आदेःपरस्य ॥ उत्थानं ॥ उत्तंभनं ॥ अत्र ॥
॥ घोषस्यमहाप्राणस्यसस्यतादृशएवथकारः ॥ तस्यझरोझरी ॥ इतिपाक्षिकोलोपः ॥ लोपाभावपक्षेथकारस्यैवश्रव
॥ श्रवणं ॥ नतुखरिचेतिचर्त्वं ॥ चर्त्वंप्रतिथस्यासिद्धत्वात् ॥ झयोहोन्यतरस्यां ॥ झयःपरस्यहस्यपूर्वसवर्णोवास्यात् ॥
॥ घोषवतोनादवतोमहाप्राणस्यसंवृतकंठस्यहस्यतादृशोवर्गचतुर्थएवादेशः ॥ वाग्घरिः ॥ वाग्हरिः ॥ शश्छोटि ॥ प ॥
॥ दात्झयःपरस्यशस्यछोवास्यादटि ॥ दस्यश्चुत्वेनजकारेकृते ॥ खरिच ॥ खरिपरेझलांचरःस्युः ॥ इतिजकारस्यच ॥
॥ कारः ॥ तच्छिवः ॥ तच्शिवः ॥ छत्वममीतिवाच्यं ॥ तच्छ्लोकेन ॥ तच्श्लोकेन ॥ अमिकिं ॥ वाक्श्च्योतति ॥ मो ॥
॥ नुस्वारः ॥ मोंतस्यपदस्यानुस्वारस्याद्धलि ॥ अलोन्त्यस्य ॥ हरिंवंदे ॥ पदस्येतिकिं ॥ गम्यते ॥ नश्चापदांतस्यझलि ॥
नस्यमस्यचापदांतस्यझल्यनुस्वारः ॥ यशांसि ॥ आक्रंस्यते ॥ झलिकिं ॥ मन्यते ॥ अनुस्वारस्यययिपरसवर्णः ॥ स्पष्टं ॥ अङ्कितः ॥

## मूळ प्रत पाहण्यासाठी संपर्क


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com